गतकविशेषे । दिक्साधनार्थं सू० सि० शङ्कुश्च दर्शितो यथा

"शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे । तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत् । तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्द्वादशाङ्गुलम् । तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्व्वापरार्द्धयोः । तत्र विन्दू विधायोभौ वृत्ते पूर्व्वापराभिधौ । तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा । याम्योत्तरदिशोर्मध्ये तिमिना पूर्व्वपश्चिमा । दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि" । तत्र दिक्साधनोपक्रमे प्रथममम्बुसंशुद्धे जलवत् समीकृते शिलाप्रदेशे अपि वाथ वा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ घुट्टनादिना समस्थाने कृते शङ्क्वङ्गुलैः शङ्कुस्याङ्गुलविभागमानघटीतैरभीष्टसंख्याकाङ्गुलैर्व्यासार्द्धरूपैस्तत्तभवक्रमात् लिखेत् । सर्व्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या स्यात् तथेत्यर्थः । ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसंख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः । शङ्कुं समतलमस्तकपरिधिकाष्ठदण्डं स्थापयेत् । ततः पूर्व्वापरार्द्धयोर्दिनस्य प्रथमद्वितीयभागयोस्तच्छायाग्रं स्थापितशङ्कोश्छायान्तप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत् । दिनस्य प्रथमविभागेऽनुक्षणं छायाह्रासात् वृत्ते यत्र प्रविशति दिनस्यापरार्द्धे छायानुक्षणवृद्धेर्वृत्तं यत्र निर्गच्छतीत्यर्थः । तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ विन्दू पूर्व्वापरसंज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्व्वापरविन्द्वन्तरमध्ये तिमिना मत्स्येन रेखा कार्य्या सा दक्षिणोत्तररेखा भवति । मत्स्यस्तु विन्द्वन्तरालस्थलमितेन व्यासार्द्धेन विन्दुद्वयकेन्द्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यामन्तर्गतं मत्स्याकारं स्थानं भवति । तत्रैकः संयोगो मुखं बाह्यवृत्तभागसम्मार्ज्जनेनापरसंयोगस्तु पुच्छमितरवृत्तभागद्वयसम्मार्ज्जनेन मुखपुच्छावध्यृज्वी रेखा दक्षिणोत्तररेखा । तत्र विन्दोः सव्यं रेखाग्रं दक्षिणा दिक् । पश्चिमविन्दोः सव्यं रेखाग्रमुत्तरा दिक् । अनन्तरं पूर्व्ववृत्तं मत्स्यस्य सम्मार्ज्जनीयः । शङ्कुरपि तत्स्थानान्निष्कास्य इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्य्यम् । दक्षिणोत्तरदिशोर्मध्यस्थाने तिमिना दक्षिणोत्तररेखामितेन व्यासार्द्धेन दक्षिणोत्तरस्थानाभ्यां पूर्व्ववत् प्रत्येकं वृत्तं विधाय पूर्व्ववत् सिद्धेन मत्स्येनेत्यर्थः । पूर्व्वपश्चिमा रेखा कार्य्या । तत्र पूर्व्वविन्दोरासन्नं रेखाग्रं पूर्व्वा पश्चिमविन्दोरासन्नं रेखाग्रं पश्चिमेति मत्स्यसम्मार्ज्जने केवला पूर्व्वापररेखापि सिद्धा । अथ रेखासंयोगस्थानात् दिक्साधनोपक्रमोक्तं पूर्व्ववृत्तमुल्लिखेत् । तद्वृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तद्वृत्तमध्यस्थ दिक्चतुष्टयं वृत्ते सिद्धम् । तद्वत् यथा दक्षिणोत्तराभ्यां पूर्व्वापरा साधिता तत्प्रकारेणेत्यर्थः । एवकारोऽन्यप्रकारनिरासार्थकः । हि निश्चयेन । विदिशः कोणदिशो दिशां पूर्व्वादिसिद्धदिशां ये मध्यमत्स्या अव्यवहितदिग्द्वयान्तरोत्पन्ना लघवस्तैः संसाध्याः सम्यक्प्रकारेण साध्याः । रेखावृत्तसंयोगस्थत्वेन ज्ञेयाः" रङ्गना० ।

छायाशब्दे २९८६ पृ० द्रष्टव्यम् ।

**शङ्कुकर्ण** पुं० शङ्कुरिव कर्णावस्य । १गर्दभे त्रिका० । दानवभेदे हरिवं० ३अ० । ३स्कन्दानुचरभेदे भा० ४७ अ० ।

**शङ्कुतरु** पुं० शङ्कुयोग्यस्तरुः । शालवृक्षे शब्दर० । शङ्कुवृक्षादयोऽप्यत्र ।

**शङ्कुला** स्त्री शकि—उलच् । १उत्पलपत्रिकायाम् संक्षिप्तसा० पूगच्छेदकास्त्रभेदे (जाँति) शङ्कुलाखण्डः इति सि०कौ० ।

**शङ्कोच(चि)** पुं० शकि—उच-(उचि) वा । मत्स्यभेदे जटा० ।

**शङ्ख** पुं०न० शम—ख । १स्वनामख्याते समुद्रजाते पदार्थे अमरः । २ललाटास्थ्नि, ३निधिभेदे, ४नखीनामगन्धद्रव्ये मेदि०, ५कर्णसमीपस्थे—अस्थ्नि, ६नागभेदे, ७हस्तिदन्तमध्ये त्रिका० । ८दशनिखर्व्वसंख्यायां, ९तत्संख्याते च । तस्य शङ्खचूडासुरास्थितस्तदुत्पत्तिः ब्रह्मवै० प्रकृ० १८अ० उक्ता यथा ।

"अथ शम्भुर्हरेः शूलं जग्राह दानवं प्रति । ग्रीष्ममध्याह्नमार्त्तण्डसमानप्रभमुत्तमम् । शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि । चकार भस्मसात्तञ्च सरथञ्चावलीलया । स शिवस्तेन शूलेन दानवस्यास्थिजालकम् । प्रेम्णा च प्रेरयामास लवणोदे च सागरे । अस्थिभिः शङ्खचूडस्य शङ्खजातिर्बभूव ह । नानाप्रकाररूपा च शश्वत् पूता सुरार्चने । प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम् । तीर्थतोयस्वरूपञ्च पवित्रं शम्भुना विना । शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा । स स्नातः सर्व्वतीर्थेषु यः स्नातः शङ्खवारिणा । शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः । तत्रैव सततं लक्ष्मीर्दूरीभूतममङ्गलम् । स्त्रीणाञ्च शङ्खध्वनिभिः